क्रियासिद्धिः सत्त्वे भवति महताम् नोपकरणे ।

# संस्कृत बालसंवादः

आषाढमासः५१११ (जुलै २००१) ||ॐ|| गुच्छः–४ सञ्चिका–२ (पृष्ठसङ्ख्या४)

सरल-संस्कृताध्ययन-प्रसारार्थं मासपत्रिका

सम्पादकः - माधव वडे / * सञ्चिकमूल्यम् - रु. ३/- * वार्षिकं शुल्कम् - २५ रूप्यकाणि ।

कोळथरे (४१५७१२) दापोली , जि. रत्नागिरी महाराष्ट्रम् ☎(०२३५८) २८५२२८

## मातृभू श्रद्धा !

सम्पूर्णे विश्वे धर्मसंस्कृति–तत्त्वज्ञानानां विजयपताकां संस्थाप्य स्वामी विवेकानन्दः भारतं प्रत्यागतः। तदा चेन्नैभूमौ अवतीर्य प्रथमं सः साष्टाङ्ग–प्रणिपातेन सह लुण्ठनं कृतवान्।

तस्य महापुरुषस्य वेदान्तिनः भावविह्वलाचरणेन तत्र संमिलिताः जनाः ते चकिताः अभवन्। जनानां तेषां भावं ज्ञात्वा स्वामी उक्तवान्–

अहं दीर्घकालं यावत् विदेशे आसम्। बहुविध–जनानां सम्पर्के आसम्। तस्मात् सहजीवनात् कदाचित् वा देहे मनसि च कश्चन विकारः प्रविष्टः वा विद्यमानः स्यादिति। तं दूरीकर्तुं निवारयितुं तु मातुः कुक्षौ लुण्ठाम्यहम्।

सर्वथा निर्विकारः भवितुं कामये अहम्। मातुः सम्पर्केण एव तद् भवितुमर्हति।



१२ जन.१८६३ -४ जुलै १९०२
पुण्यस्मरणम्

## भारतीय रसशास्त्रज्ञः–नागार्जुनः।

कदाचित् पीनसकारणेन कस्यचित् राज्ञः अनारोग्यं सञ्जातम्। तस्मात् मस्तिष्के कृमयः उत्पन्नाः। चिकित्सार्थं वैद्यः आहूतः। राज्ञः परीक्षणं कृतवान् सः।

वैद्यः – रोगः असाध्यः नास्ति किन्तु अहं बौद्धपन्थीयः अस्मि। जीवहत्यां तु न कर्तुमर्हामि। तस्मात् चिन्ताग्रस्तोऽहम्। सम्यग् विचिन्त्य एकदिनानन्तरं चिकित्सां करिष्यामि। तावान् अवसरः मह्यं दातव्यः कृपया।

अपरे दिने वैद्यः पुनरागतः। किञ्चित् नस्यौषधं दत्तम्। ततः शीघ्रं नासिकातः कृमयः बहिर्गताः। राजा स्वस्थः अभवत्।

वैद्यः सः आसीत् नागार्जुनः। भारतीयरसशास्त्रज्ञः। वैद्यकशास्त्रे अतिविशिष्टः ज्ञाता। चरकसुश्रुतवाग्भटाः इव महान् पुरुषः।

कक्षपुट–तन्त्रं, रसरत्नाकरः, लोहशास्त्रं, आदिशास्त्रं चेति ग्रन्थाः तेन रचिताः। प्रजनन–विज्ञानविषयकस्य अपि ग्रन्थस्य रचयिता अस्ति सः इति मन्यते।

## तस्मै श्रीगुरवे नमः।

आत्मीय बन्धो !

गुरुपूर्णिमायां गुरुपूजनं भवति। यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः। किन्तु को वा श्रेष्ठ इति मन्येत? प.पू. डॉ. हेडगेवारः किं उक्तवान्? अवश्यं ज्ञायेत। "यद्यपि श्रेष्ठः स्यात् तथापि कोऽपि मनुष्यः परिपूर्णः नास्ति, किञ्चित् न्यूनं भवति एव। अपि च मनुष्यः अमर्त्यः न, किन्तु तत्त्वं नित्यं भवति। भगवद्ध्वजः नित्यं भवति। यस्य दर्शनेन राष्ट्रस्य सम्पूर्णेतिहासः, संस्कृतिः, परम्पराः च झटिति स्मर्यन्ते। यस्य दर्शनात् उत्तेजितं मनः अतिविशिष्टया स्फूर्त्या प्रभावितं भवति। अत एव स ध्वजः तस्य तत्त्वस्य प्रतीकमिति गुरुरूपेण अस्माकं पुरतः तिष्ठति। तस्य पूजनेन गौरवशालिनी प्रेरणा प्राप्यते" इति।

वदतु संस्कृतम् !

सरलसंस्कृतम् !!

जयतु भारतम् !!!

योगिनी ११/५१११

श्रीक्षेत्रकोळथरे माधवः।



## चित्रवर्णनम्

शब्दाधारेण ५/६ वाक्यैः चित्रवर्णनं लिखतु ।

मञ्जूषा २६— चिकित्सागृहं, वैद्यः, धात्री, रुग्णः, शय्या, परीक्षा च।

संस्कृतवाक्यरचनां कर्तुं मनसि संस्कृतेन चिन्तनं भवति चेत् तत् सामर्थ्यं शीघ्रं प्राप्यते।तदर्थं कल्पित अवसर एषः।

## धातु-परिचयः



गण गणयति(१० उ.प.)

मधुरा मणीः गणयति।

**गणयति गणयतु**

**गणयिष्यति गणितवान्**

**गणयेत् गणयित्वा गणयितुं गणनीयम्**

सुशीलः—अम्ब, मधुराम् आह्वयतु। अहं गृहपाठं लिखामि, सा अत्र आगत्य मां पीडयति।

माता —(पाकगृहतः) मधुरे! आगच्छतु वत्से। आम्रं ददामि।

मधुरा —(पाकगृहमागत्य) ददातु, कुत्र अस्ति।

माता —उत्पीठिकायां कण्डोले सन्ति। पोलिकानिर्माणम् अभवत्, गणयतु कति पोलिकाः सन्ति? तावत् हस्तौ प्रक्षाल्य आगच्छामि।

मधुरा —एकं द्वे त्रीणि......दश। अपि च एषा एकादशी लघुपोलिका। कियती सुन्दरी अस्ति। आकाशे चन्द्रमा इव दृश्यते।.

माता —(आम्रकण्डोलं भूमौ स्थापयित्वा) गणितवती न वा पोलिकाः? एषा लघुपोलिका तुभ्यं निर्मिता अस्ति। आम्ररसेन सह खादतु।

मधुरा —आम् निश्चयेन। इदानीम् आम्रानि एतानि गणयित्वा ददामि।

माता —किन्तु सर्वाणि गणयितुम् आवश्यकता नास्ति। पञ्च आम्रानि इदानीं पर्याप्तानि। अद्य सायङ्काले तातः सुशीलाय टिप्पणीः आनेष्यति। ताः अपि

*............द्वितीयस्तम्भे अनुवर्तते।*

## .....स्वस्थो रक्षार्थमायुषः।

### संस्कारात् लघवः सन्ति !

**संस्काराल्लघवः सन्ति भक्ष्या गौधूमपैष्ठिकाः।**
**धानापर्पटपूपाद्यास्तान् बुद्ध्वा निर्दिशेत्तथा।।**

यवगोधूमतण्डुलानां खाद्यपदार्थाः निर्माणप्रक्रिया—संस्कारात् लघवः भवन्ति। अपि च धाना, पर्पटः, अपूपः च इत्यादयः पदार्थाः संस्कारेण पचनसुलभाः भवन्ति।

पृथुकाः अपि गुरवः सन्ति, शीघ्रं पचनं न भवति अतः भृष्टाः किन्तु अल्पमात्रया सेवनीयाः। मुद्गमाषचणक इव द्विदलधान्यं वातलं रूक्षं शीतलं च भवति अतः तस्मात् यथोचितं संस्कारेण निर्मिता पदार्थाः अल्पशः सेवनीयाः।



मन्दाग्निना निर्मिताः पदार्थाः सर्वदा स्थूलाः कठिनाः च अतःगुरवः सन्ति। किन्तु अधिक—कालपर्यन्तं पाचनेन ते सेवनयोग्याः भवन्ति। पचनसुलभाः ते पुष्टिबलप्रदाः अपि भवन्ति।

अतः स्वस्थः जनः पाकसंस्कारस्य महत्त्वं जानीयात्, स्वास्थ्यरक्षणं च कुर्यात्। स एव आहारविवेकः इति उच्यते।

*...........प्रथमस्तम्भात् अनुवर्तते।*

गणयिष्यसि न वा? तातः उक्तवान्— "मधुरा यथावश्यकं गणयेत्, तस्मै च दद्यात्" इति।

मधुरा —एवं चेत् उत्तमम्।किन्तु इदानीं मह्यं चूषणाय आम्रं ददाति न वा?

माता —मह्यं पञ्च ददातु, अपि च कण्डोलात् यत् किमपि स्वीकरोतु। किन्तु चूषणं सावधानतया भवतु, अर्धनिचोलस्योपरि न पातनीयः रसः, किम्?

मधुरा —आम्, निश्चयेन।

## स्वामी विवेकानन्द उवाच–

कश्चन सम्राट् मृगयार्थं गतवान्। तदा अरण्ये कश्चन तपन् साधुः दृष्टः। तैजसं मुखमण्डलं दृष्ट्वा प्रभावितः राजा चिन्तितवान्–"साधुः राजगृहं नेतव्यः। तस्य सादरं सन्माननं करणीयम्। तस्मै यथेष्टं दानं च करणीयम्" इति। राजा साधोः पुरतः स्वेच्छां प्रकटितवान्। प्रारम्भे अनङ्गीकृतवान् साधुः क्षणं यावत् विचिन्त्य सम्मतिं दर्शितवान्।

उभौ राजगृहं आगतौ।

राजा – (सादरं) आसनम् अलङ्करोतु मुनिवर्य! स्वल्पकालं यावत् तिष्ठतु, ईशवन्दनं करोमि, ततः शीघ्रम् आतिथ्येन सह किञ्चित् दानरूपेण प्रदास्यामि।

(साधुः आसनस्थः अभवत्। पार्श्वे तत्र स्थितः देवं प्रणम्य प्रार्थितवान्।)

राजा – हे प्रभो! राज्यं देहि। सन्ततिं देहि, सम्पत्तिं च मे देहि।

प्रार्थना सम्पन्ना। राजा यदा नेत्रोद्घाटनं कृतवान्, तदा उत्थाय बहिर्गन्तुं सज्जः आसीत्। तं दृष्ट्वा झटिति तस्य पुरतः आगत्य,

राजा – मुनिवर्य! क्षन्तव्योऽहं कृपया। विलम्बः अभवत्, किन्तु अस्वीकृत्य न कोऽपि गन्तव्यः इतः, तिष्ठतु कृपया। दानं स्वीकृत्यैव गच्छतु मुनिवर्य!

साधुः – भोः राजन्! भवान् सम्राट् इति मन्यमानः। अहं प्रार्थनां श्रुत्वा अवगतवान्। भ्रमः सः मम। भवान् न सम्राट्, दरिद्रः एव। ईश्वरं प्रति राज्यं देहि, सन्ततिं सम्पत्तिं च देहि इति याचितवान् खलु? दरिद्रात् दानं न स्वीक्रियते। दरिद्रः किं दातुमर्हति? गच्छ, प्रथमं स्वेच्छाः भोगान् च प्राप्नोतु। गच्छाम्यहम्।

## भार्गवराम! वृष्टिं देहि ।

।।श्रीः।। ईश्वरपुरम्।

ज्येष्ठः कृ.१२/५१११

प्रिय सुयश,

सस्नेहं नमोनमः।

कुशली सन् कुशलं कामये।

गतसप्ताहे अत्रागतः। तदनन्तरं शीघ्रं मम महाविद्यालयः आरब्धः। आदिनं तदर्थं समययापनं भवति। सद्यः वृष्टिकालः किन्तु न वृष्टिः आरब्धा। सूर्यस्य आर्द्राप्रवेशः जातः किन्तु प्रखरातपेन अत्युष्णम् अनुभूयते।

वृष्टेः अभावस्य कारणं किं वा स्यात् इति चिन्तयन् परह्यः अस्माकं महाविद्यालये व्याख्यानं श्रुतवान्। तदा वक्ता सन्दर्भवशात् पर्जन्यविषयकं किञ्चित् विवरणं उक्तवान्। यथा –

सूर्यमालायां मङ्गलः उष्णग्रहः। तस्य प्रभावात् अवर्षणं, अपि च शुक्रः शीतग्रहः तस्य प्रभावात् पृथिव्यां वृष्टिः सम्भाव्यते। किन्तु सूर्यमालायाः एकत्र प्रभावात् वृष्टिः अवर्षणं वा इति परिणामः। तथापि सद्य शुक्रमङ्गलयोः युतिः जून २१ तमे दिनाङ्के भविष्यति। ततः मङ्गलस्य प्रभावात् वृष्टेः अभावः जुलै–मासार्धपर्यन्तं वा स्यादिति।

किं वा स्यात् न जानाम्यहं किन्तु प्रत्ययप्रामाण्येन तथ्यं किमिति ज्ञातुं शक्नुयाम खलु?

वृष्टेः अभावात् जीवनं सर्वथा प्रभावितं भविष्यति इति मन्ये। सद्यः प्रत्येकत्र चर्चाविषयः स एव अस्ति। अतः भार्गवराम! वृष्टिं देहि इत्येव प्राथ्र्यते।

अस्तु, गृहे पितृभ्यां सादरं वन्दनानि, अनुजायै वेदवत्यै शुभाशिषः चेति विरमामि।

इति भवदीयः सुहृद्,

प्रणवः।

## मञ्जूषा २५ -(उत्तरम्)चित्रे...

आपणः एषः। आपणे विक्रेता अस्ति। तस्य पृष्ठतः वस्तूधानीद्वयमस्ति। तत्र वस्तूनि स्थापितानि सन्ति। आपणे ग्राहिका एका वस्तूनि क्रीणाति। तस्याः हस्ते कण्डोलः अस्ति। कण्डोले सा वस्तूनि स्थापयति।

## ३९. अमरकोशतः ...किञ्चित् !

**क्षत्रियः राजा च**

मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट्।
राजा राट् पार्थिवक्ष्मा भृन्नृपभूपमहीक्षितः।

द्वितीयकाण्डम् (क्षत्रियवर्गः)१४६९–७०।।

मूर्धाभिषिक्तः राजन्यः बाहुजः क्षत्रियः विराट् इति **क्षत्रियस्य** ५ **शब्दाः**। राजा राट् पार्थिवः क्ष्माभृत् नृपः भूपः महीक्षितः च इति **राज्ञः** ७ **शब्दाः** सन्ति।

४ छात्रेभ्यः शब्दरञ्जिनी - चित्रस्य आधारेण शब्दान्वेषणं करोतु ..३४



| | | | |
|---|---|---|---|
| न | — | की | • |
| — | • | • | • |
| ने | — | दी | — |
| • | — | षि | — |
| • | त् | • | • |

शब्दरञ्जिनी — ३३

स्थूल:,बिडाल:,बिन्दु:,इन्दु:,फेन:,श्येन:,मेघ:।



.....तुष्यामि शब्दमात्रेण !



अहमस्मि नीलकण्ठस्तव
खलु तुष्यामि शब्दमात्रेण।
नाहं जलधर भवत:
चातक इव जीवनं याचे।।

हे मेघ! नीलकण्ठ: मयूरोऽहम्। भवत: ध्वनिं श्रुत्वा एव सन्तुष्ट: अस्मि।चातक: नास्मि, य: भवत:(मेघात्) जलार्थ याचनां करोति। जलं यद् चातकजीवनम् तत् तेनैव याचनीयम् इति युक्तमपि।

किन्तु अहं भवत: शब्दमात्रेण तुष्यामि भो:। **चातक: इव न जीवनं याचे इति मयूरस्य प्रार्थनां श्रुतवत: मेघ: सद्य: न वर्षति खलु?**



☺ *हास: मास्तु कृपया !* ☺

## पर्जन्यात् वा रक्षणीयं तद् भो:?



आपणिक: — सावधानतया छत्रस्य एतस्य उपयोगं करिष्यति चेत् आजीवनम् एतदेव पर्याप्तं भविष्यति।

ग्राहक: —उत्तमं तत्। किन्तु सावधानतया नाम कथं तस्योपयोग: करणीय: भो:?

आपणिक: — तथा न कोऽपि विशेष: अपि। आतपात् वा पर्जन्यात् वा केवलं तद् रक्षणीयम्। सर्वदा पुटीकृतं भवति चेत् उत्तमम्।

**बालसंवादस्य नवीनं ग्राहकत्वं नवीकरणं च**

१. श्री. यशवन्त सदाशिव वैशम्पायन,
डोम्बिवली ☎ (०२५१) २४३५२२४
२. श्री. विलास दिनकर इस्वलकर,
बोरीवली ☎(०२२) २८९२०१७९
३. सौ. माधवी दीपक जोशी,
चिपळूण ☎(०२३५५) २५१२१६

**इत्यत्र शुल्कधनदानेन शक्यते।**

**पठामि संस्कृतं नित्यं। वदामि संस्कृतं सदा। ध्यायामि संस्कृतं सम्यक्। वन्दे संस्कृतमातरम्॥**

**सविधे -**

चतुर्वर्षात्मकमपि शुल्कधनं १००.०० रुप्यकाणि प्रेषयित्वा नवीनं ग्राहकत्वं, नवीकरणं च शक्यते।

☞ येषां वार्षिकशुल्ककालावधि: जुलै०९ पर्यन्तमस्ति ते शुल्कं प्रेषयित्वा <u>नवीकरणं</u> <u>कुर्वन्तु</u> <u>कृपया</u>।

**सकाशात् -**
**संस्कृत बालसंवाद:**
**कोळथरे जि.रत्नागिरी,**
**४१५७१२ महाराष्ट्रम्**

**- RNI ( Ragistration) No.-**
**MAHSAN/2005/16878 Dt. 24.07.2006**

**- Postal Ragistration No.-**
**G/RNP/RTG - 18/2007 - 09**

R




Printed, Published and owned by Madhav Narayan Bade Printed at Pitruchaya Printing Press At & Post- Dapoli, House No.213, Veer Savarkar Marg, Tahasil - Dapoli, Dist - Ratnagiri,Maharashtra State, Pin Code - 415712 and published from At & Post- Kolthare, House No. 159, Tahasil - Dapoli, Dist : Ratnagiri Maharashtra State, Pin Code - 415712 Editor - Madhav Narayan Bade